गृहीतविस्मृतव्याप्तेरपि पुंसोऽनुमानो( ? नानु )दयेन व्याप्तिस्मृतेरप्यनुमितिहेतुत्वात् TarkBhā.(Ke.) 39. 4.

**अगृहीतव्याप्तिक** ( agṛhītavyāpti-ka ) *adj.* **i** of which the concomitance (with the probandum) is not known अप्रसिद्धः अगृहीतव्याप्तिको विरुद्ध एवाभिधीयते Kiraṇā. 293. 18; उपनयवैयर्थ्यमपि व्याख्यायते न त्वगृहीतव्याप्तिकमपि Upask. 66. 19 (*on* ii. 1. 1); 155. 5 (*on* iii. 1. 15); **ii** who does not know the invariable concomitance (between the probans and the probandum) न धूमेनाग्न्यनुमानसिद्धिः···अगृहीतव्याप्तिकानां च तस्मिन् काले इति भावः Bhāsk. ii. 84. 16 (*on* ii. 3. 2)

**अगृहीतव्याप्तिकत्व** ( agṛhītavyāptika-tva ) *n.* the state of being that whose concomitance (with the probandum) is not known वायुना सहागृहीतव्याप्तिकत्वाददृष्टलिङ्गत्वमुक्तम् Upask. 84. 14 (*on* ii. 1. 10)

**अगृहीतशक्ति** ( agṛhīta-śakti ) *adj.* **i** ( a word ) whose denotative power is not grasped अगृहीतशक्तेश्च वाचकत्वे व्यभिचारप्रसङ्गः PrakaPañ. 384. 16; अगृहीतशक्तीनां च पदानामबोधकत्वात् NyāySu.(Ja.) 495A. 2 (*on* iii. 2. 1); अन्यथा अगृहीतशक्त्यादिभ्योऽपि बोधप्रसङ्गादिति वदन्ति VaiyāBhū. 34. 14 (*on* 7); **ii** who has not known the denotative power (of words) अगृहीतशक्तिस्तु वाच्यावाच्यं विवक्ति न GaṇeP. i. 13. 29.

**अगृहीतशक्तिक** ( agṛhītaśakti-ka ) *adj.* [ *f.* -ā ] **i** (a word) of which the denotative power is not known अगृहीतसङ्गतिके अगृहीतशक्तिके LaCandr. 703. 23; अगृहीतशक्तिकादप्यर्थोपस्थित्यापत्तेः VaiyāBhū. 178. 19 (*on* 33); 190. 22 (*on* 36); **ii** that ( individual object ) in respect of which the significative power is not grasped शाब्दबोधे त्वगृहीतशक्तिकैव व्यक्तिर्भासते VaiyāBhū. 119. 12 (*on* 25)

**अगृहीतशक्तिकता** ( agṛhītaśaktika-tā ) *f.* the state of not having known the denotative power (of words) अगृहीतशक्तिकतया मिथः कथास्ववबद्धमौनकृतहस्तचेष्टिताः। अमरस्त्रियो रणहताश्च तद्भटाः S'ivLī. 18. 16.

**अगृहीतशक्तिकत्व** ( agṛhītaśaktika-tva ) *n.* the state of being that whose denotative power is not known लाक्षणिको हि शब्दो न श्रुतमात्रोऽर्थान्तरे धियमुपजनयति । तत्रागृहीतशक्ति( क )त्वात् NyāySu.(Ja.) 114B. 8 (*on* i. 1. 5); लाक्षणिकशब्दो न श्रुत एवार्थान्तरधीहेतुः तत्रागृहीतशक्तिकत्वात् Nyāyāmṛ. 538A. 4 (*on* 2. 13)

**अगृहीतशब्द** ( agṛhīta-śabda ) *adj.* who has not known the word (as having meaning) तेनागृहीतशब्दोऽपि गोत्वादीन् प्रतिपद्यते S'lokaVār. 4. 176 (189. 8)

**अगृहीतशब्दार्थ** ( agṛhīta-śabdārtha ) *adj.* ( one ) who has not known the meaning of a word न चागृहीतशब्दार्थैः कैश्चिद्व्याकरणाश्रयात् । व्याख्यातुं शक्यते वेदः TantrVā. 212. 1 (*on* i. 3. 18)

**अगृहीतशस्त्र** ( agṛhīta-śastra ) *adj.* who has not accepted the weapon (i. e. office) अमात्य राक्षस अगृहीतशस्त्रेण भवतानुगृह्यते वृषल इत्यतः संदेहः MudrāRā. 7. 14(3)

**अगृहीतशुल्ककन्या** ( agṛhītaśulka-kanyā ) *f.* a maiden in whose case bride-price has not been accepted एतच्चागृहीतशुल्ककन्यामदत्वा कस्यचित् ManvaMu. 381. 8 (*on* 9. 99)

**अगृहीतषोडशिक** ( agṛhītaṣoḍaśi-ka ) *adj.* [ *f.* -ā ] ( Atirātra sacrifice ) in which the filling of the *ṣoḍaśi* vessel with Soma juice has not been observed एकस्यामपि गृहीतषोडशिकायामतिरात्रव्यक्तावगृहीतषोडशिकायाः सकाशाद् गुणाधिक्येऽपि नातिरात्रभिन्नयागत्वम् AnuBh. 208. 13 (*on* iii. 3. 2)

**अगृहीतसंवाद** ( agṛhīta-saṁvāda ) *adj.* which has not been corroborated नापि दोषाभावः भ्रान्तप्रतारकवाक्यजन्यज्ञाने प्रत्यक्षेणागृहीतसंवादे तदभावात् TattvCin. iv(1). 102. 3.

**अगृहीतसंकेत** ( agṛhīta-saṅketa ) *adj.* **i** (a sense) in regard to which the conventional power of signification has not been known तस्मात्संकेतदृष्टोऽर्थो व्यवहारे न दृश्यते । न चागृहीतसंकेतो ( बोध्येता )न्य इव ध्वनेः TattvSaṁ. 874; गोशब्दस्यागृहीतसंकेतं वाहीकार्थमभिधातुमशक्यत्वात् SāhīDa. 50. 1; **ii** (a person) who has not understood the conventional power of signification (of a word) यदि शब्दव्यापारः कथमगृहीतसंकेतो नावगच्छति PramāVāBh. 15. 15; संकेतस्मृत्यनपेक्षत्वे अगृहीतसंकेतस्यापि प्रथमश्राविणोऽर्थप्रत्ययप्रसङ्गः TātpaṬ.(Vā.) 469. 21 (*on* ii. 2. 57); अगृहीतसंकेतस्य ··· पदार्थानध्यवसानम् Kāvyānu.(He.) (comm.) 335. 17; कवाज्ञानत्वेनैव तात्पर्यग्राहकत्वेऽगृहीतसङ्केतस्यापि तात्पर्यग्रहापत्तेः BhāṭṭDī. iii. 221. 21 (*on* x. 2. 13); **iii** (a word) whose conventional power of signification has not been known न च पदान्यगृहीतसंकेतानि पदार्थान् स्मारयन्ति TātpaṬ.(Vā.) 56. 6 (*on* i. 1. 1); अगृहीतसंकेतस्य शब्दस्यार्थप्रतीतेरभावात् संकेतसहाय एव शब्दोऽर्थविशेषं प्रतिपादयति KāvyPra. 31. 3; अगृहीतसंकेतस्यार्थप्रतिपत्तेरकरणाद् गृहीतसंकेत एव शब्दोऽर्थप्रतिपादकः Kāvyānu.(He.) (comm.) 32. 12; **iv** (a particular or individual thing) with regard to which the conventional power of signification has not been known अगृहीतसंकेतानामपि व्यक्तिविशेषाणामन्वयबोधविषयताया उपपादनेऽपि न निस्तारः RasGaṅ. 183. 2.

**अगृहीतसंकेतता** ( agṛhītasaṅketa-tā ) *f.* the state of being (a word) whose conventional power of signification has not been known वचनानाम् ···अगृहीतसंकेततयाप्रतिपादकत्वात् NyāyVārPari. 726. 6.

**अगृहीतसंगति** ( agṛhīta-saṅgati ) *adj.* **i** the connection of which has not been known (by a person) चक्षुरादयो रूपादिष्वगृहीतसंगतयः प्रवर्तन्ते TātpaṬ.(Vā.) 413. 20 (*on* ii. 1. 52); **ii** (a word) whose conventional power of signification has not been known अगृहीतसंगतेश्च वाचकत्वेऽतिप्रसङ्गात् Bhām. 237. 21 (*on* i. 3. 28); अव्युत्पन्नेनागृहीतसंगतिना पदेनोपेतं यद्वाक्यम् अतिदेशवाक्यमिति यावत् TārkiRa. 85. 3.

**अगृहीतसंगतिक** ( agṛhītasaṅgati-ka ) *adj.* **i** (a word) whose conventional power of signification is not known तत्र···अगृहीतसंगतिकानां पदानामपि बोधकतानुपपत्तिर्बाधिका PramāMā. 18. 9; न च शब्दविशेषस्यागृहीतसंगतिकस्यैव बोधकत्वम् NyāySu.(Ja.) 281A. 10 (*on* ii. 1. 3); अगृहीतसंगतिकानां च पदानां बोधकत्वानुपपत्तिः SarvaDaKau. 121. 24; अगृहीतसंगतिके पदे तदयोगात् AdvaiSi. 703. 2; **ii** (a person) who has not known the conventional power of signification (of a word) देशान्तरगतं प्रसिद्धं चैत्रं काश्यां शृण्वतां विशिष्यागृहीतसंगतिकानामपि नलयुधिष्ठिरादिपदादिवद्बोधानुभवात् VaiyāBhū. 126. 25 (*on* 26)

**अगृहीतसंगतिकत्व** ( agṛhītasaṅgatika-tva ) *n.* the state of being (a word) whose conventional power of signification is not known अगृहीतसंगतिकत्वेनार्थावबोधकत्वासंभवात् YuktiSneha. 141. 22 (*on* i. 1. 6); तत्सत्त्वेऽपि ( शब्दसत्त्वेऽपि ) श्रोत्रा तस्यागृहीतसंगतिकत्वात् शब्दादसाधारणजातिविशेषावच्छिन्नमाधुर्यावगमो नास्तीति जिज्ञासानुवृत्तिर्युक्तेति शङ्क्यम् SiddhāLeSaṁ. 216. 6.

**अगृहीतसंगतिता** ( agṛhītasaṅgati-tā ) *f.* the state of being that whose relationship (with a word or its significative power) is not grasped अगृहीतसंगतितयापदार्थस्य ब्रह्मणो वाक्यार्थत्वानुपपत्तेः Bhām. 102. 15 (*on* i. 1. 4)

**अगृहीतसंगतित्व** (agṛhītasaṅgati-tva) *n.* the state of being that whose conventional power of signification is not known न च वाक्यगतो गवयशब्दस्तस्य वाचकः तथा तदानीमगृहीतसंगतित्वात् TātpaṬ.(Vā.) 411. 4 (*on* ii. 1. 47); लिङादयो न मानान्तरापूर्वकार्याभिधायिनः तत्रागृहीतसंगतित्वात् NyāyMa. 226. 2; न च वैदिको लिङादिः परामिमतकार्यबोधकः तत्रागृहीतसंगतित्वात् PrakaVi. 75. 16; न तावच्छरीरशब्दो भूतसूक्ष्मं वक्तुं शक्तः तत्रागृहीतसंगतित्वात् PrakaVi. 327. 14.

**अगृहीतसमय** ( agṛhīta-samaya ) *adj.* (a word) whose conventional power of signification is not known अगृहीतसमयस्य शब्दस्याप्रमापकत्वात् NyāyVārPari. 68. 7.

**अगृहीतसमयक** ( agṛhītasamaya-ka ) *adj.* whose conventional power of signification has not been known अगृहीतसमयकसंज्ञया वाक्यार्थसामानाधिकरण्येन संज्ञानिमित्तप्रकारतापरिच्छेदो वा TattvCin. iii. 99. 2.

**अगृहीतसमयता** ( agṛhītasamaya-tā ) *f.* the state of being (an expression) whose conventional power of signification is not known सर्वेषां वचनानामप्रतीतविषयत्वेनागृहीतसमयतया अप्रतिपादकत्वात् ĀtmaTaVi. 200. 14.

**अगृहीतसमयत्व** ( agṛhītasamaya-tva ) *n.* the state of not knowing the conventional power of signification (of a word) न ह्यसौ ततः शब्दस्मृतिमान् अगृहीतसमयत्वात् Kiraṇā. 320. 7.

**अगृहीतसंबन्ध** ( agṛhīta-sambandha ) *adj.* **A i** who has not comprehended the relation न चागृहीतसंबन्धाः ··· । शब्दं जानन्ति S'lokaVār. 9. 78 (426. 3); अगृहीतसंबन्धस्य धूमदर्शने सत्यपि वह्निप्रतीतेरभावात् TātpaṬ.(U.) 394. 14 (*on* 5(5). 29); कथं च तेषामगृहीतसंबन्धानां शब्दसंभिन्नार्थबोधः Kāśi. i. 249. 10 (*on* 4. 112); अत एवागृहीतसंबन्धस्यार्थमविदुषः ··· न ··· अनुपपत्तिः शाम्यति Kāśi. iii. 185. 10 (*on* 5(7). 78); अगृहीतसंबन्धस्य तत्कृतोपकारादर्शनात् NyāyMañ. i. 365. 23; यस्तावदगृहीतसंबन्धः ··· स वाक्यार्थप्रतिपत्तौ नाधिक्रियते PrakaPañ. 402. 1; अगृहीतसंबन्धानां शब्दानुल्लेखिनः प्रत्ययस्योत्पत्तेः TārkiRa. 62. 1; गवयसदृशो गौरिति विज्ञानं नानुमानम् अगृहीतसंबन्धस्याप्युपजायमानत्वात् YuktiSneha. 76. 13 (*on* i. 1. 5); 78. 28 (*on* i. 1. 5); **B** whose relation is not comprehended or not cognized अगृहीतसंबन्धानामतदाकारत्वेन प्रतिपत्तिः TātpaṬ.(U.) 173. 19 (*on* 4. 219); शब्दोऽपि नागृहीतसंबन्धः प्रतिपादकः Kāśi. i. 65. 7 (*on* 2. 19); NyāyMañ. i. 77. 32; i. 138. 6; i. 266. 13; अगृहीतसंबन्धस्य च पदस्य वाचकत्वे एकस्माच्छब्दात्सर्वार्थप्रतीतिप्रसङ्गः PrakaPañ. 381. 10; न चानुमानमगृहीतसंबन्धमुदेति TātpaṬ.(Vā.) 107. 5 (*on* i. 1. 3); NayaVi. 265. 8 (*on* i. 1. 24); NyāyRa. 789. 20-790. 11 (*on* 6. 234); S'āstrDī. 150. 11 (*on* i. 1. 7); S'arka. 46. 9; अगृहीतसंबन्धस्य दृष्टान्तेऽप्यस्मरणात्